# ॥ श्री हनुमद् ध्यानम् ॥

# Śrī Hanumad Dhyānam

मरकतमणिवर्णं दिव्यसौन्दर्यदेहं

**marakatamaṇivarṇaṁ divyasaundaryadehaṁ**

नखरदशनशस्त्रैर्वज्रतुल्यैः समेतम् ।

**nakharadaśanaśastrairvajratulyaiḥ sametam |**

तडिदमलकिरीटं मूर्ध्नि रोमाङ्कितं च

**taḍidamalakirīṭaṁ mūrdhni romāṅkitaṁ ca**

हरितकुसुमभासं नेत्रयुग्मं सुफुल्लम् ॥ १ ॥

**haritakusumabhāsaṁ netrayugmaṁ suphullam || 1||**

अनिशमतुलभक्त्या रामदेवस्य योग्यान्-

**aniśamatulabhaktyā rāmadevasya yogyān-**

निखिलगुरुचरित्राण्यास्यपद्माद्वदन्तम् ।

**nikhilagurucaritrāṇyāsyapadmādvadantam |**

स्फटिकमणिनिकाशे कुण्डले धारयन्तं

**sphaṭikamaṇinikāśe kuṇḍale dhārayantaṁ**

गजकर इव बाहुं रामसेवार्थजातम् ॥ २ ॥

**gajakara iva bāhuṁ rāmasevārthajātam || 2||**

अशनिसमद्रढिम्नं दीर्घवक्षःस्थलं च

**aśanisamadraḍhimnaṁ dīrghavakṣaḥsthalaṁ ca**

नवकमलसुपादं मर्दयन्तं रिपूंश्च ।

**navakamalasupādaṁ mardayantaṁ ripūṁśca |**

हरिदयितवरिष्ठं प्राणसूनुं बलाढ्यं

**haridayitavariṣṭhaṁ prāṇasūnuṁ balāḍhyaṁ**

निखिलगुणसमेतं चिन्तये वानरेशम् ॥ ३ ॥

**nikhilaguṇasametaṁ cintaye vānareśam || 3||**

॥ इति श्री मार्कण्डेयपुराणे श्रीहनुमद्ध्यानं सम्पूर्णम् ॥

**|| iti śrī mārkaṇḍeyapurāṇe śrīhanumaddhyānaṁ sampūrṇam ||**